अनुक्रमाङ्क ..............................   कूट सं. : 820163-$SA_2$(M)

कृपया जाँच कर लें कि इस प्रश्न-पत्र में कुल 20 प्रश्न हैं और कुल 8 मुद्रित पृष्ठ हैं।

कक्षा - अष्टमी

# संस्कृतम्

(संकलनात्मक-मूल्याङ्कनम् - II)

निर्धारितावधि - होरात्रयम्   पूर्णाङ्का: - 90

निर्देशा: -

1. अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् क्रमे लेखनीयानि।
4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
5. प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।
6. खण्डसङ्ख्या अपि लेखनीया।

## खण्ड:-'क' (अपठित-अवबोधनम्)   10

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

रावण: लङ्कायाः राजा आसीत्। तस्य जन्म ब्राह्मणकुले अभवत्। स: अतीव विद्वान् भगवत: शिवस्य च परमभक्त: अपि आसीत्। स: कठिनं तप: कृत्वा अनेका: शक्तय: प्राप्य शक्तिशाली चापि अभवत्। एतस्मात् कारणात् स: अहङ्कारी अभवत्। रावण: श्रीरामस्य पत्नीं सीताम् अहरत् तदैव तस्य नाश: अभवत्। एतादृश: ज्ञानी शक्तियुक्त: अपि रावण: अहङ्कारकारणात् मृत्युं गत:। अत: ज्ञानं शक्तिं च प्राप्य जीवने कदापि अहङ्कारं मा कुरुत। विद्वांस: अपि कथयन्ति यत् -

ज्ञानविघ्नो अहङ्कार!

प्रश्ना:   1×2=2

(I) एकपदेन उत्तरत -

(i) क: लङ्कायाः राजा आसीत्?

(ii) रावणस्य नाशस्य कारणं किम्?

(II) पूर्णवाक्येन उत्तरत -   2×2=4

(i) स: कथम् अहङकारी अभवत्?

(ii) किं प्राप्य जीवने अहङ्कारं मा कुर्यात्?

(III) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - ½×4=2

(क) 'अहरत्' इति क्रियापदस्य कर्तृपदं किम्?

(i) रावण: (ii) सीताम्

(iii) श्रीरामस्य (iv) पत्नीम्

(ख) 'अतीव' इति पदस्य विशेष्यपदं किमस्ति?

(i) विद्वान् (ii) शिवस्य

(iii) परमभक्त: (iv) भगवत:

(ग) 'जीवने अहङ्कारं मा कुरुत' अस्मिन् वाक्ये अव्ययपदं चित्वा लिखन्तु -

(i) अहङ्कारम् (ii) जीवने

(iii) मा (iv) कुरुत

(घ) 'अज्ञानम्' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत -

(i) ज्ञानम् (ii) ज्ञानस्य

(iii) ज्ञानी (iv) ज्ञानात्

(IV) गद्यांशस्य उचितं शीर्षकं लिखत। 2×1=2

## खण्ड:-'ख' (रचनात्मक-कार्यम्) (10)

2. अध: प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च-वाक्यानि लिखत- 1×5=5



मञ्जूषा - लघुवाटिका, द्वे, पादपा:, सन्ति, वदत:, मित्रे, वृक्षा:, त्रोटयति, बालक:, पुष्पाणि

3. भवान् छात्रावासे वसति। भवत: विद्यालय: शीतकालीन- अवकाशे छात्रान् भ्रमणार्थं नेष्यति। अत: पितु: अनुमतिं धनं च प्राप्तुम् अधोलिखितं पत्रं मञ्जूषायां प्रदत्तपदै: पूरयत - ½×10=5

छात्रावासत:

(i) .....................

आदरणीया: पितृचरणा:

(ii) .......................

अत्र कुशलम् (iii) .......................। मम परीक्षा (iv) .......................।

(v) ....................... भवन्तं कथयितुम् इच्छामि यत् अवकाशे शैक्षणिक भ्रमणाय

छात्रां: आगरानगरम् (vi) .......................। अहम् अपि (vii) ....................... गन्तुम् इच्छामि। अत: भवतां (viii) ....................... आवश्यकी (ix) ....................... उत्तरस्य प्रतीक्षायाम्।

भवदीय: (x) .......................

देवांश:

मञ्जूषा : 

| |
|---|
| गमिष्यन्ति, पुत्र:, प्रणामा:, तत्र, तत्रास्तु, समाप्ता, अनुमति:, भवताम्, अहम्, भोपालनगरम् |

## खण्डः-'ग' ( अनुप्रयुक्त-व्याकरणम् ) (35)

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत - 1×3=3

(i) यथा परिश्रम: <u>तथा+एव</u> परिणाम:।

(ii) वयं मिलित्वा <u>पर्यावरणं</u> रक्षिष्याम:।

(iii) गुरु: वदति- 'श्लोकस्य <u>अनु+अयं</u> लिखत।

5. (अ) विकल्पेभ्य: उचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत - ½×6=3

(क) ...................... कुटीर: रमणीय: अस्ति।

(i) मुनि: (ii) मुनिभ्याम्

(iii) मुने: (iv) मुनिषु

(ख) मम ...................... तीव्रा अस्ति।

(i) मतिभ्य: (ii) मति:

(iii) मतौ (iv) मतिम्

(ग) ...................... ईश्वरं नमन्ति।

(i) साधव: (ii) साधुभि:

(iii) साधु: (iv) साधुभ्याम्

(घ) मम ...................... अनेके गुणा: सन्ति।

(i) माता (ii) मातरम्

(iii) मातरि (iv) मात्रा

(ङ) पुत्र: ...................... पश्यति।

(i) पितु: (ii) पितरम्

(iii) पितृभि: (iv) पिता

(च) ...................... सर्वे: पूजनीय: भवति।

(i) विद्वान् (ii) विदुषाम्

(iii) विदुषा (iv) विदुषे

(आ) उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत - 1×3=3

(क) ..................... पुस्तकं ज्ञानवर्धकम् अस्ति।

(i) एतत् (ii) एतेषाम्

(iii) एषः (iv) एताभ्याम्

(ख) ..................... व्यवहारः शोभनः अस्ति।

(i) तत् (ii) तेन

(iii) तस्य (iv) तेषु

(ग) ..................... उपवने बाला अपि क्रीडन्ति।

(i) अयम् (ii) इदम्

(iii) इयम् (iv) अस्मिन्

6. (अ) अधोलिखिते कोष्ठके प्रदत्तसंख्यां संस्कृतेन लिखत - 1×2=2

(क) संस्कृतदिवसस्य कार्यक्रमं द्रष्टुम् .............................. जनाः विद्यालयम् आगच्छन्। (52)

(ख) रामस्य पितामहः ..................... वर्षीयः भूत्वा अपि स्वस्थः अस्ति। (75)

(आ) उचितम् उत्तरं चित्वा लिखत - ½×2=1

(क) .............................. बालः ध्यानेन न पठति।

(i) एकम् (ii) एका

(iii) एकः (iv) एकाः

(ख) .............................. फले वृक्षात् पततः।

(i) द्वयोः (ii) द्वे

(iii) द्वाभ्याम् (iv) द्वौ

7. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत - 1×3=3

(i) सः .................... आगमिष्यति।

(ii) ज्ञानम् .................... जीवनम् अपूर्णम्।

(iii) शिशुः .................... रोदति।

**मञ्जूषा** | विना, उच्चैः, श्वः |

8. रेखाङ्कितपदेषु उपसर्गं संयोज्य पृथक् कृत्वा वा लिखत - 1×3=3

(i) खगः आकाशे <u>विहरति</u>।

(ii) <u>प्रत्येकं</u> क्षणस्य सदुपयोगं कुर्यात्।

(iii) छात्राः इतस्ततः <u>परि+भ्रमन्ति</u>।

9. रेखाङ्कितपदेषु विभक्तिं तत्कारणं च लिखत - 1×5=5

(i) माता <u>पुत्रे</u> स्निह्यति।

(ii) <u>मञ्चस्य</u> उपरि नर्तकाः नृत्यन्ति।

(iii) मित्रम् <u>मित्राय</u> उपहारं यच्छति।

(iv) <u>सर्वेभ्यः</u> स्वस्ति।

(v) <u>विद्यायाः</u> ऋत्ते जीवनं निरर्थकम्।

10. अधोलिखितेषु समस्तपदानां समासस्य नामानि लिखत – 1×3=3

(i) पार्वतीपरमेश्वरौ

(ii) यथासमयम्

(iii) निर्जनम्

11. विकल्पेभ्यः उचितं धातुरुपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत – 1×5=5

(क) चित्रकाराः सुन्दराणि चित्राणि ____________ ।

(i) रचयन्ति (ii) रचयामः

(iii) रचयथ (iv) रचयतः

(ख) योग्यः शिष्यः पुरस्कारम् ____________।

(i) अलभेथाः (ii) अलभन्त

(iii) अलभामहि (iv) अलभत

(ग) वयं शीतपेयम् आनन्देन ____________।

(i) पास्यन्ति (ii) पास्यथः

(iii) पास्यामः (iv) पास्यसि

(घ) यूयं प्रतिदिनं गुरुं ____________।

(i) नमेयुः (ii) नमेः

(iii) नमेत (iv) नमेताम्

(ङ) त्वं जीवने कदापि असत्यं न ____________।

(i) वद (ii) वदतु

(iii) वदन्तु (iv) वदानि

12. वाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत :- 1×4=4

(i) छात्राः सर्वदा ____________ इच्छन्ति। (<u>भ्रम्+तुमुन्</u>)

(ii) मया गृहकार्यं समयेन <u>कृतम्</u>।

(iii) जनाः कार्यालयं प्रति, <u>गन्तुं</u> सज्जाः भवन्ति।

(iv) अहम् उत्तराणि <u>लिखितवान्</u>।

## खण्डः-'घ' ( पठित-अवबोधनम् ) ( 35 )

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

एकदा एकस्मिन् वने एकः श्रृगालः भोजनं प्राप्तुम् इतस्ततः भ्रमति स्म। तदैव सः मूषकाणां समूहं दृष्ट्वा तान् खादितुं चिन्तयति। तस्य मूषक-समूहस्य राजा हृष्टः-पुष्टः आसीत्। श्रृगालः मूषकसमूहम् अनुसरति। तान् मूषकान् खादितुम् इच्छया सः मूषकाणां बिलस्य समीपं गच्छति। सः श्रृगालः किञ्चित् चिन्तयित्वा मूषकाणां बिलात् बहिः सूर्यं प्रति उद्घाटितेन मुखेन तिष्ठति।

(I) एकपदेन उत्तरत - ½×2=1

(क) कः इतस्ततः भ्रमति स्म?

(ख) राजा कीदृशः आसीत्?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) श्रृगालः किमर्थं मूषकाणां बिलस्य समीपं गच्छति?

(ख) श्रृगालः केषां समूहं दृष्ट्वा तान् खादितुं चिन्तयति?

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'दूरम्' इति पदस्य विपरीतपदं गद्यांशात् चित्वा लिखत -

(i) बहिः (ii) समीपम्

(iii) एकदा (iv) इतस्ततः

(ख) 'श्रृगालः भोजनं प्राप्तुम् इतस्ततः भ्रमति' अस्मिन् वाक्ये अव्ययपदं किम्?

(i) भोजनम् (ii) इतस्ततः

(iii) श्रृगालः (iv) भ्रमति

14. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

येषां न विद्या न तपो न दानम् ज्ञानं न शीलं न गुणो न धर्मः।<br>
ते मर्त्यलोके भुवि भार भूताः मनुष्यरूपेण मृगाः चरन्ति।।

(I) एकपदेन उत्तरत - ½×2=1

(क) मनुष्यरूपेण के चरन्ति?

(ख) प्रथम गुणः कः अस्ति?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) गुणहीना जनाः कुत्र भारभूताः भ्रमन्ति?

(ख) कीहशाः जनाः मनुष्यरूपेण मृगाः इव चरन्ति?

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'अवगुणः' इति पदस्य विपरीतपदं श्लोके किम्?

(i) विद्या (ii) गुणः

(iii) दानम् (iv) शीलम्

(ख) 'चरन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(i) भारभूताः (ii) विद्या

(iii) मृगाः (iv) तपः

15. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

सर्वे छात्राः - (उत्थाय) वयं प्रणमामः मान्यवर।

आचार्यः - सुखिनः भवन्तु। शुभ-पन्थाः। तिष्ठन्तु।
(सर्वे उपविशन्ति जिज्ञासया आचार्यं पश्यन्ति)

आचार्यः - (सर्वान् दृष्ट्वा) किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति।

सर्वे - (मिलित्वा) आम् मान्यवर! वयम् अस्माकं पूर्व-राष्ट्रपति-महोदयानां जीवनस्य विषये ज्ञातुम् इच्छामः। कृपया वदन्तु।

आचार्यः - अतीव शोभनम्। अवश्यमेव कथयिष्यामि। प्रारम्भे अहं कथयिष्यामि। मध्ये-मध्ये भवन्तः पृच्छन्तु। (श्यामपट्टं दृष्ट्वा सूक्तिं च पठित्वा) अतिशोभनम्। किम् एतदर्थम् एव इयं सूक्तिः अत्र लिखिता?

(I) एकपदेन उत्तरत - ½×2=1

(क) के आचार्यं नमन्ति?

(ख) श्यामपट्टे का लिखिता?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) आचार्यः सर्वान् दृष्ट्वा किं वदति?

(ख) छात्राः कस्य विषये ज्ञातुम् इच्छन्ति?

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'इयम्' इति विशेषणपदस्य विशेष्यपदं किम्?

(i) एतदर्थम् (ii) सूक्तिम्

(iii) सूक्तिः (iv) एव

(ख) 'कथयिष्यामि' इति क्रियापदस्य कर्तृपदं किम्?

(i) अहम् (ii) त्वम्

(iii) वयम् (iv) यूयम्

16. मञ्जूषायां प्रदत्तैः पदैः भावार्थे रिक्तस्थानानि पूरयित्वा भावार्थं लिखत - 1×4=4

(अ) जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।

भावार्थः - एकेन एकेन बिन्दुना एव घटः ________ पूरितः भवति। एवमेव ये जनाः निरन्तरं प्रयासं कुर्वन्ति, ते शनैः शनैः कार्यकरणेन अपि ________ प्राप्स्यन्ति एव।

(आ) गतः कालः न पुनरूपैति।

भावार्थः - शीघ्रम् एव कार्याणि करणीयानि। समयः ________ न करणीयः यतः क्षणेन क्षणेन यः समयः व्यतीतः भवति सः पुनः न आगच्छति। अतः ________ महत्त्वं ज्ञातव्यम्।

मञ्जूषा - | जलेन, समयस्य, सफलताम्, नष्टः |

17. अधोलिखितौ श्लोकौ पठित्वा उचितपदैः अन्वयं पूरयत - ½×8=4

(अ) वाणी रसवती यस्य, यस्य श्रमवती क्रिया।
लक्ष्मीः दानवती यस्य, सफलं तस्य जीवितम्।।

<u>अन्वयः</u> - यस्य (i) ________ रसवती, यस्य क्रिया (ii) ________, (iii) ________ लक्ष्मीः दानवती, तस्य जीवितं (iv) ________।

(आ) वृत्तं यत्नेन संरक्षेत् वित्तम् आयाति याति च।
अक्षीणः वित्ततः क्षीणः वृत्ततस्तु हतो हतः।।

<u>अन्वयः</u> - वृत्तं यत्नेन (i) ________ वित्तं तु (ii) ________ याति च। वित्ततः (iii) ________ तु अक्षीणः वृत्ततः तु हतः (iv) ________।

18. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखत - 1×5=5

(क) तत्र समीपम् एव एकः यात्री अतिष्ठत्।
(ख) दयानन्दः तस्य कृते फलानि प्रेषितवान्।
(ग) महर्षिः काशीनगरे शिष्यैः सह तिष्ठति स्म।
(घ) यात्री लज्जितः अभवत्।
(ङ) सः दयानन्दाय दुर्वचनानि वदति स्म।

19. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - 1×5=5

(क) <u>मूषकाः</u> चकिताः भवन्ति।
(ख) <u>स्वाध्यायप्रवचनाभ्याम्</u> न प्रमदितव्यम्।
(ग) <u>महर्षिः</u> भारते अभ्रमत्।
(घ) विद्याहीनाः <u>पृथिव्यां</u> भारः इव भवन्ति।
(ङ) <u>धर्मस्य</u> कार्ये प्रमादः न करणीयः।

20. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कुरुत - ½×4=2

| | |
|---|---|
| (क) घोषम् | (i) समाप्तः |
| (ख) गतः | (ii) जानाति |
| (ग) जलम् | (iii) नादम् |
| (घ) वेत्ति | (iv) पयः |